श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीदेशिकपञ्चदशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीदेशिकपञ्चदशी ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीवाजिवक्त्रकरुणापरिरम्भिताय
श्रीवत्स्यदेशिककटाक्षविवर्धिताय।
श्रीवादिहंसजलदार्यसमीक्षिताय
श्रीवादिवारणमृगेन्द्रगुरो ! नमस्ते॥ 1 ॥

श्रुतिद्वयशिरोगुरुप्रथितपङ्क्तिसंसेवितं
श्रुतिद्वयशिरोगुरुं भज भवेत् सती ते गतिः।
श्रुतिद्वयशिरोगिरां सरसभावसंसेवनं
श्रुतिद्वयशिरोगतं सुभगभूषणं क्वान्यतः॥ 2 ॥

मधु वाचि मधुद्विडन्तरङ्गे
तव यद्देशिक ! तत्त्वतीव चित्रम्।
मनसो वचसोऽपि चैकरूप्यं
महतां भूषणमामनन्ति सन्तः॥ 3 ॥

चक्षुः श्रुतेरुपरि सन्ततमात्तलीलं
चक्षुः श्रुतेरिति भजन्निह रङ्गनाथम्।
चक्षुः श्रुतेरवगतेः गुरुरान्तरं नः
चक्षुर्युगं श्रुतियुगं सफलं विधत्ताम्॥ 4 ॥

रङ्गं निवासेन विभूषयन्तं
रङ्गं परं स्वैर्वचसां विलासैः।

अङ्गं च पुण्ड्रैरभिरामभूतैः
तुङ्गं गुरुं कञ्चिदुपाश्रयामः ॥ 5 ॥

विषादथाग्नेरथवाऽभिचारात्
विषाददायाश्च सदाऽज्ञतायाः।
भियं विहन्तुं कुशलं च गन्तुं
धियं गुरोरस्य पदे कुरुध्वम् ॥ 6 ॥

सुहृत्सुपर्णस्य सुदर्शनस्य
सुपर्ववृक्षस्य हयाननस्य।
श्रियो विभुत्वस्य नतेर्विधाता
यतोऽयमास्ते गुरुसार्वभौमः ॥ 7 ॥

वल्मीकसम्भवमुनेरपि माननीयं
मन्ये भवन्तमवनौ कविसार्वभौमम्।
जन्माऽभजत् किल स भूःश्रवणे भवांस्तु
जन्माऽभजत् पुनरथ श्रवणे नभस्ये ॥ 8 ॥

द्वैपायनो मुनिवरस्स भवानपीह
कन्याभवौ निगममूर्ध्र्यमाततान।
सूत्रावलिं किल भवानथ सारपङ्क्तिं
मुक्ताकलापसहितामिति नाम भेदः ॥ 9 ॥

अनेकदुर्वाद्यजतोऽभिरक्षन्
अस्मन्मतं सस्यमतीव भोग्यम्।
अनन्तसूरेरयमात्मजोऽस्मान्
अनन्तसन्तोषनिधीन् वितेने ॥ 10 ॥

कृपासरित्स्रोतसि तावकीने
    कृताप्लवो देशिक ! यस्तु जन्तुः।
कृती स चित्रं निजतेजसाऽत्र
    कृपीडयोनेरपि भाति जेता ॥ **11** ॥

सर्वात्मसंरक्षणजागरूक
    गुर्वात्मना वेङ्कटनाथघण्टा।
सर्वंसहायां सहसावतीर्णा
    दुर्वादिशब्दान् तिरयाञ्चकार ॥ **12** ॥

तत्त्वत्रयस्यापि मतत्रयस्य
    दैवत्रयस्यापि मुनित्रयस्य।
श्रुतित्रयस्यापि रसं विवेक्तुः
    लोकत्रयं धारयते महस्ते ॥ **13** ॥

एको भवान् हयमुखेन तु सद्वितीयः
    त्रय्यन्तदेशिकमणे ! चतुरः पुमर्थान्।
पञ्चापि कल्पकतरून् वितरन् विजित्य
    योगं षडङ्गमहितं भुवने व्यतारीत् ॥ **14** ॥

केन प्रीतिमुपैति विष्णुरनघो दत्तेन निष्कल्मषं
    तन्नेत्राकृति किं स कस्य तु तरोः शेते पलाशे विभुः।
कीदृक्षः श्रुतिषु श्रुतः सह सुरैस्तेने स किं क्षीरधौ
    यः प्रश्नोत्तरमध्यवर्णघटितस्तस्मै नमस्कुर्महे ॥ **15** ॥

देवं परं तं च सदा भजन्तं
    शिखां च वेदस्य परामृशन्तम्।
कविं महान्तं तमिमं विलोक्य
    स्थाने बुधा देशिक इत्युशन्ति ॥ **16** ॥

श्रीमद्देशिकपञ्चदशाख्या श्रीमत्याश्रितकल्पकवीरुत्।
श्रीमद्देशिकवीक्षाभाजा श्रीनिधिकविना कलिता जयति॥ **17**॥

॥ इति श्रीदेशिकपञ्चदशी समाप्ता॥